# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
| --- | --- | --- |
| विषयः - ज्यौतिषशास्त्रम् | (C.E.- 5.3.3. Old) | |
| दिनाङ्कः - ०८/१२/२०१८ | सरलजन्मपत्रीविज्ञानम् | समयः -१०.०० तः १.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितश्लोकयोः सान्वयं व्याख्यां कुरुत । ( कस्यापि एकस्य )** **( ५ )**

*(१) भोग्यपत्नी पतिं शुक्रः क्षीणचन्द्रोऽपि शुक्रवत् ।*
*जनयेत् कर्कटे भौमे मृतस्त्रीकं नराधमम् ॥*

*(२) द्वितीये द्वादशे स्थाने यदा पापो व्यवस्थितः ।*
*तदा मार्तृमयं विन्द्याच्चतुर्थे दशमे पितृः ॥*

**प्रश्नः २ अधोलिखितयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **( १० )**

*(१) सहजभावविचारः (२) नवमांशफलम् ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितश्लोकयोः सान्वयं व्याख्यां कुरुत । ( कस्यापि एकस्य )** **( ५ )**

*(१) कुभार्या सप्तमे पापाः सौम्यः सर्वजनप्रियम् ।*
*गुरु-शुक्रो शचीतुल्यां रूपलावण्यशालिनीम् ॥*

*(२) भाग्येश्वरो भाग्यगतोऽस्ति किं वा स्वस्थानगः सारविराजमानः ।*
*भाग्याश्रितः कोऽस्ति विचार्यसर्वमनल्पमल्पं परिकल्पनीयम् ॥*

**प्रश्नः ४ अधोलिखितेषु कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **( १० )**

*(१) अरिष्टभङ्गयोगाः । (२) दशमभावविचारः ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितश्लोकयोः सान्वयं व्याख्यां कुरुत । ( कस्यापि एकस्य )** **( ५ )**

*(१) यदा चश्मखोरा भवेल्लग्नखाने तदा मुश्तरी बख्तखाने विलग्नात् ।*
*स जातः शुतुर्फीलजातीदृषाढ्यो जरीजर्जरी वक्तदाता चिरायुः ॥*

*(२) सर्वंसहः स्थिरतरोऽतितरां समृद्धः सत्त्वाधिकः समशरीरविरजमानः ।*
*नात्युच्चकः सरलदृक् प्रवलामलश्रीयुक्तः किलोभयपरी प्रभवो नरः स्यात् ॥*

**प्रश्नः ६ अधोलिखितेषु कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **( १० )**

*(१) भद्रयोगस्य फलम् । (२) केमद्रुमभंगयोगः ।*

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितश्लोकयोः सान्वयं व्याख्यां कुरुत ।( कस्यापि एकस्य )** **( ५ )**

*(१) रविशशियुते सिंहे लग्ने कुजार्किनिरीक्षिते ।*

*नयनरहितः सौम्यासौम्यैः सबुद्बदलोचने ।*

*व्ययगृहगतश्चन्द्रो वामं हिनस्त्यपरं रवि*

*न शुभगदिता योगा चाप्या भवन्ति शुभेक्षिताः ।*

*(२) शत्रुक्षयं मानसुताश्चलाभं प्रतापवृद्धिं नृपतेः प्रमादम् ।*

*शरीरपुष्टिं विविधोद्यमांश्च ददाति वित्तं मुथहा तनुस्था ॥*

**प्रश्नः ८ अधोलिखितेषु कमप्येकं प्रश्नं सविस्तरं निरूपयत ।** **( १० )**

*(१) मुंथादृष्टिफलम् । (२) वर्षेशसूर्यफलम् ।*

**पञ्चमान्वितिः**

**प्रश्नः ९ अधोलिखितप्रश्नानां संक्षेपेण उत्तराणि ददतु ।( कोऽपिदश )** **( १० )**

*(१) सूर्यस्य होरामध्ये चन्द्रमा भवति तदा जातकः कीदृशं भवति ?*

*(२) जले मृत्युः कस्मिन् वर्षे भवति ?*

*(३) व्याघ्रात् कस्मिन् वर्षे मृत्यु भवति ?*

*(४) सूर्यस्य शत्रुग्रहाः के के ?*

*(५) सूर्यस्य होरामध्ये यस्य जातकस्य जन्मः भवति स कीदृशः भवति ?*

*(६) जातकः एकवर्षं कदा जीवति ?*

*(७) नवमभावस्य अपरं नाम किम् ?*

*(८) केन्द्र अर्थात् किम् ?*

*(९) शुक्रस्य अपरं नाम किम् ?*

*(१०) षड्ग्रहाः यदि उच्चराशेः भवन्ति तदा कः योगः भवति ?*

*(११) आपोक्लिम् अर्थात् किम् ?*

*(१२) क्रूरग्रहाः कति तेषां नामानि ?*

*(१३) सूर्यग्रहस्य उच्चराशिः कः ?*

*(१४) कलत्रभावः अर्थात् कः भावः ?*

*(१५) द्वितीयस्थाने भृगुसुतास्ति तर्हि जातकस्य भार्या किं भवति ।*

--oo--